# शिव कवचं

अथ ध्यानम्
वज्रदंष्ट्रं त्रिनयनं कालकण्ठ मरिन्दमम् ।
सहस्रकर मप्युग्रं वन्दे शम्भुम् उमापतिम् ॥

रुद्राक्ष कङ्कण लसत् करदण्ड युग्मः
पालान्तरा लसित भस्म धृत त्रिपुण्ड्रः ।
पञ्चाक्षरं परिपठन् वर मन्त्रराजं
ध्यायन् सदा पशुपतिं शरणं व्रजेथाः ॥

अतः परं सर्वपुराण गुह्यं निःशेष पापौघ हरं पवित्रम् ।
जयप्रदं सर्व विपत्प्रमोचनं वक्ष्यामि शैवं कवचं हिताय ते ॥

॥ अथ कवचम् ॥

ऋषभ उवाच ।
नमस्कृत्य महादेवं विश्वव्यापिन मीश्वरम् ।
वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम् ॥ १॥

शुचौ देशे समासीनो यथावत्कल्पितासनः ।
जितेन्द्रियो जितप्राण श्चिन्तयेच्छिव मव्यम् ॥ २॥

हृत्पुण्डरीकान्तर संनिविष्टं स्वतेजसा व्याप्तनभो ऽवकाशम् ।
अतीन्द्रियं सूक्ष्म मनन्तमाद्यं ध्यायेत्परानन्द मयं महेशम् ॥ ३॥

ध्यानावधूता खिल कर्मबन्धश् चिरं चिदान्द निमग्न चेताः ।
षडक्षर न्यास समाहितात्मा शैवेन कुर्यात्कवचेन रक्षाम् ॥ ४॥

मां पातु देवोऽखिल देवतात्मा संसार कूपे पतितं गभीरे ।
तन्नाम दिव्यं वर मन्त्रमूलं धुनोतु मे सर्वमघं हृदिस्थम् ॥ ५॥

सर्वत्र मां रक्षतु विश्वमूर्तिः ज्योति र्मयानन्द घनश्चिदात्मा ।
अणोरणीया नुरुशक्ति रेकः स ईश्वरः पातु भया दशेषात् ॥ ६॥

यो भूस्वरूपेण बिभर्ति विश्वं पायात्स भूमे र्गिरिशोऽष्टमूर्तिः ।
योऽपां स्वरूपेण नृणां करोति सञ्जीवनं सोऽवतु मां जलेभ्यः ॥ ७॥

कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः ।
स कालरुद्रोऽवतु मां दवाग्नेः वात्यादि भीते रखिलाच्च तापात् ॥ ८॥

प्रदीप्त विद्युत्कनकावभासो विद्या वराभीति कुठार पाणिः ।
चतुर्मुख स्तत्पुरुष स्त्रिनेत्रः प्राच्यां स्थितं रक्षतु मामजस्त्रम् ॥ ९॥

कुठार खेटाङ्कुश पाशशूल कपाल ढक्काक्ष गुणान्दधानः ।
चतुर्मुखो नीलरुचि स्त्रिनेत्रः पाया दघोरो दिशि दक्षिणस्याम् ॥ १०॥

कुन्देन्दु शङ्ख स्फटिकावभासो वेदाक्षमाला वरदाभयाङ्कः ।
त्र्यक्षश् चतुर्वक्त्र उरुप्रभावः सद्योऽधिजातोऽवतु मां प्रतीच्याम् ॥ ११॥

वराक्षमाला भयटङ्क हस्तः सरोज किञ्जल्क समानवर्णः ।
त्रिलोचन श्चारु चतुर्मुखो मां पाया दुदिच्यां दिशि वामदेवः ॥ १२॥

वेदाभयेष्टाङ्कुश टङ्कपाश कपाल ढक्काक्षर शूलपाणिः ।
सितद्युतिः पञ्चमुखोऽवतान्माम् ईशान ऊर्ध्वं परम प्रकाशः ॥ १३॥

मूर्धान मव्यान् मम चन्द्रमौलिः भालं ममाव्या दथ भालनेत्रः ।
नेत्रे ममाव्याद् भगनेत्रहारी नासां सदा रक्षतु विश्वनाथः ॥ १४॥

पायाच्छ्रुती मे श्रुतिगीतकीर्तिः कपोल मव्यात् सततं कपाली ।
वक्त्रं सदा रक्षतु पञ्चवक्त्रो जिह्वां सदा रक्षतु वेदजिह्वः ॥ १५॥

कण्ठं गिरीशोऽवतु नीलकण्ठः पाणिद्वयं पातु पिनाक पाणिः ।
दोर्मूल मव्यान् मम धर्मबाहु वक्षःस्थलं दक्ष मखान्तकोऽव्यात् ॥ १६॥

ममोदरं पातु गिरीन्द्र धन्वा मध्यं ममाव्यान् मदनान्तकारी ।
हेरम्बतातो मम पातु नाभिं पायात्कटी धूर्जटि रीश्वरो मे ॥ १७॥

ऊरुद्वयं पातु कुबेर मित्रो जानुद्वयं मे जगदीश्वरोऽव्यात् ।
जङ्घायुगं पुङ्गव केतुरव्यात् पादौ ममाव्यात् सुरवन्द्य पादः ॥ १८॥

महेश्वरः पातु दिनादियामे मां मध्ययामेऽवतु वामदेवः ।
त्रियम्बकः पातु तृतीययामे वृषध्वजः पातु दिनान्त्ययामे ॥ १९॥

पायान्निशादौ शशिशेखरो मां गङ्गाधरो रक्षतु मां निशीथे ।
गौरीपतिः पातु निशावसाने मृत्युञ्जयो रक्षतु सर्वकालम् ॥ २०॥

अन्तःस्थितं रक्षतु शङ्करो मां स्थाणुः सदा पातु बहिःस्थितं माम् ।

तदन्तरे पातु पतिः पशूनां सदाशिवो रक्षतु मां समन्तात् ॥ २१॥

तिष्ठन्त मव्याद् भुवनैकनाथः पायाद्व्रजन्तं प्रमथाधिनाथः ।
वेदान्त वेद्योऽवतु मान्निषण्णं मामव्ययः पातु शिवः शयानम् ॥ २२॥

मार्गेषु मां रक्षतु नीलकण्ठः शैलादि दुर्गेषु पुरत्रयारिः ।
अरण्य वासादि महाप्रवासे पायान् मृगव्याध उदार शक्तिः ॥ २३॥

कल्पान्त काटोप पटु प्रकोपः स्फुटाट्ट हासोच्चलिताण्ड कोशः ।
घोरारि सेनार्णव दुर्निवारम् अहाभया द्रक्षतु वीरभद्रः ॥ २४॥

पत्त्यश्व मातङ्ग घटावरूथ सहस्र लक्षायुत कोटि भीषणम् ।
अक्षौहिणीनां शतमाततायिनां छिन्द्यान्मृडो घोर कुठार धारया ॥ २५॥

निहन्तु दस्यून् प्रलयानलार्चिः ज्वलत्त्रिशूलं त्रिपुरान्तकस्य ।
शार्दूल सिंहर्क्ष वृकादि हिंस्त्रान् सन्त्रासयत् वीशधनुः पिनाकम् ॥ २६॥

दुःस्वप्न दुःशकुन दुर्गति दौर्मनस्य दुर्भिक्ष दुर्व्यसन दुःसह दुर्यशांसि ।
उत्पात ताप विषभीति मसद्ग्रहार्ति व्याधींश्च नाशयतु मे जगतामधीशः॥ २७॥

ॐ नमो भगवते सदाशिवाय, सकल तत्त्वात्मकाय,
सकल तत्त्व विहाराय, सकल लोकैक कर्त्रे, सकल लोकैक भर्त्रे,
सकल लोकैक हर्त्रे, सकल लोकैक गुरवे, सकल लोकैक साक्षिणे,
सकल निगम गुह्याय, सकल वरप्रदाय, सकल दुरितार्ति भञ्जनाय,
सकल जगदभयङ्काराय, सकल लोकैक शङ्कराय, शशाङ्क शेखराय,
शाश्वत निजाभासाय, निर्गुणाय, निरुपमाय, निरूपाय, निराभासाय,

निराममाय, निष्प्रपञ्चाय, निष्कलङ्काय, निर्द्वन्द्वाय, निःसङ्गाय,
निर्मलाय, निर्गमाय, नित्यरूप विभवाय, निरुपम विभवाय, निराधाराय,
नित्य शुद्ध बुद्ध परिपूर्ण सच्चिदानन्दाद्वयाय, परमशान्त प्रकाशाय,
तेजोरूपाय

जयजय महारुद्र, महारौद्र, भद्रावतार, दुःख दाव दारण,
महाभैरव, कालभैरव, कल्पान्त भैरव, कपाल मालाधर,
खट्वाङ्ग खड्ग चर्म पाशाङ्कुश डमरु शूल-चाप बाण गदा शक्ति
भिण्डिपाल-तोमर मुसल भुशुण्डी मुद्गर पट्टिश परशु परिघ-शतघ्नी
चक्राद्यायुध भीषणकर, सहस्रमुख, दंष्ट्राकराल वदन,
विकटाट्टहास, विस्फारित ब्रह्माण्ड मण्डल, नागेन्द्र कुण्डल, नागेन्द्रहार,
नागेन्द्र वलय, नागेन्द्र चर्मधर, मृत्युञ्जय, त्र्यम्बक, त्रिपुरान्तक, विरूपाक्ष,
विश्वेश्वर, विश्वरूप, वृषभवाहन, विषभूषण, विश्वतोमुख, सर्वतोमुख,

मां रक्ष रक्ष, ज्वलज्वल प्रज्वल प्रज्वल, महामृत्युभयं अपमृत्युभयं नाशय
नाशय, रोगभयं उत्सादयोत्सादय, विषसर्पभयं शमय शमय,
चोरभयं मारय मारय, मम शत्रू नुच्चाट योच्चाटय, शूलेन विदारय
विदारय, कुठारेण भिन्धि भिन्धि, खड्गेन छिन्धि छिन्धि, खट्वाङ्गेन
विपोथय विपोथय, मुसलेन निष्पेषय निष्पेषय, बाणैः सन्ताडय सन्ताडय,
रक्षांसि भीषय भीषय, भूतानि विद्रावय विद्रावय, कूष्माण्ड वेताल
मारीगण ब्रह्मराक्षसान् सन्त्रासय सन्त्रासय, मामभयं कुरु कुरु,
वित्रस्तं माम् आश्वासय आश्वासय, नरकभयान् माम् उद्धारयोद्धारय,
सञ्जीवय सञ्जीवय, क्षुत्तृड्भ्यां माम् आप्याय आप्याय, दुःखातुरं माम्
आनन्दय आनन्दय, शिव कवचेन माम् आच्छादय आच्छादय, हर हर
मृत्युञ्जय, त्र्यम्बक, सदाशिव, परमशिव नमस्ते नमस्ते नमस्ते नमः।

फलश्रुतिः ।

ऋषभ उवाच ।
इत्येतत्कवचं शैवं वरदं व्याहृतं मया ।
सर्वबाधा प्रशमनं रहस्यं सर्व देहिनाम् ॥ २८॥

यः सदा धारयेन्मर्त्यः शैवं कवच मुत्तमम् ।
न तस्य जायते क्वापि भयं शम्भो रनुग्रहात् ॥ २९॥

क्षीणायु र्मृत्यु मापन्नो महारोग हतोऽपि वा ।
सद्यः सुख मवाप्नोति दीर्घ मायुश्च विन्दति ॥ ३०॥

सर्वदारिद्र्य शमनं सौमङ्गल्य विवर्धनम् ।
यो धत्ते कवचं शैवं स देवैरपि पूज्यते ॥ ३१॥

महापातक सङ्घातै र्मुच्यते चोपपातकैः ।
देहान्ते शिव माप्नोति शिववर्मानुभावतः ॥ ३२॥

त्वमपि श्रद्धया वत्स शैवं कवच मुत्तमम् ।
धारयस्व मया दत्तं सद्यः श्रेयो ह्यवाप्स्यसि ॥ ३३॥

सूत उवाच ।
इत्युक्त्वा ऋषभो योगी तस्मै पार्थिव सूनवे ।
ददौ शङ्खं महारावं खड्गं चारि निषूदनम् ॥ ३४॥

पुनश्च भस्म संमन्त्र्य तदङ्गं सर्वतोऽस्पृशत् ।
गजानां षट्सहस्रस्य द्विगुणं च बलं ददौ ॥ ३५॥

भस्म प्रभावात् सम्प्राप्य बलैश्वर्य धृति स्मृतीः ।
स राजपुत्रः शुशुभे शरदर्क इव श्रिया ॥ ३६॥

तमाह प्राञ्जलिं भूयः स योगी राज नन्दनम् ।
एष खड्गो मया दत्तस्तपो मन्त्रानुभावतः ॥ ३७॥

शितधार मिमं खड्गं यस्मै दर्शयसि स्फुटम् ।
स सद्यो म्रियते शत्रुः साक्षान्मृत्यु रपि स्वयम् ॥ ३८॥

अस्य शङ्खस्य निह्रादं ये शृण्वन्ति तवाहिताः ।
ते मूर्च्छिताः पतिष्यन्ति न्यस्तशस्त्रा विचेतनाः ॥ ३९॥

खड्ग शङ्खाविमौ दिव्यौ परसैन्य विनाशिनौ ।
आत्मसैन्य स्वपक्षाणां शौर्य तेजो विवर्धनौ ॥ ४०॥

एतयोश्च प्रभावेन शैवेन कवचेन च ।
द्विषट्सहस्र नागानां बलेन महतापि च ॥ ४१॥

भस्मधारण सामर्थ्या च्छत्रु सैन्यं विजेष्यसि ।
प्राप्य सिंहासनं पैत्र्यं गोप्ताऽसि पृथिवी मिमाम् ॥ ४२॥

इति भद्रायुषं सम्य गनुशास्य समातृकम् ।
ताभ्यां सम्पूजितः सोऽथ योगी स्वैरगति र्ययौ ॥ ४३॥

इति श्रीशिव कवच स्तोत्र कथनं सम्पूर्णम्।